B.A. Sanskrit General

Semester – II

Course – CC A2

Topic – Section – C (unit – 1)

Origin and development of Prose romances

গদ্যসাহিত্যের ইতিহাস

For Tutorial

By Arpita Rana

Scanned with CamScanner

B.A. Sem-II (SANG) गद्यसाहित्यस्य इतिहास (Tutorial)

कादम्बरी– महाकविः बाणभट्टः हर्षचरितं, कादम्बरी चेति गद्यकाव्यद्वयं रचितवान्। कादम्बरी कथाजातीयं गद्यकाव्यम्. बाणभट्टस्य कादम्बरी इति कथाकाव्यं गद्यकाव्येषु सर्वश्रेष्ठमस्ति. कादम्बरी जन्मत्रयस्य प्रेमकथा. अत्र नायकः चन्द्रापीडः, नायिका कादम्बरी। अत्र उज्जयिन्याः नृपस्य तारापीडस्य पुत्रेण चन्द्रापीडेन सह गन्धर्वराजकन्यायाः कादम्बर्याः तथा मन्त्रिपुत्रेण सह महाश्वेतायाः प्रणयवृत्तं ~~...~~ वर्णितम्, यद्यपि बाणः ~~...~~ ग्रन्थसमाप्तौ समर्थः न अभवत्, तथा हि बाणपुत्रेण भूषणभट्टेन अयं ग्रन्थः समापितः। ग्रन्थस्य मूलः रसः हि विप्रलम्भशृङ्गारः। कादम्बरी-शब्दस्य अर्थः सुरा तदुक्तं पण्डितैः– "कादम्बरीरसज्ञानामाहारोऽपि न रोचते" इति।

दशकुमारचरितम्– महाकविना दण्डिना दशकुमारचरितमिति गद्यकाव्यं विरचितम्, दशकुमारचरितम् आख्यायिकाजातीयं गद्यकाव्यम्, अस्मिन् ग्रन्थे विभागद्वयं वर्तते- पूर्वपीठिका उत्तरपीठिका चेति, पूर्वपीठिकायां पञ्च उच्छ्वासाः उत्तरपीठिकायञ्च अष्टौ उच्छ्वासाः सन्ति। दशकुमाराणां विचित्रं वृत्तम् अस्मिन् ग्रन्थे वर्णितम्, मगधराजस्य नृपस्य राजहंसस्य पुत्रः राजवाहनः तस्य नवसंख्यकैः मित्रैः सह देशभ्रमणे बहिर्गतवान्, सर्वेषां कुमाराणां विचित्राभिज्ञतायाः वृत्तं हि दशकुमारचरितम्, मन्यते यत् दण्डी ग्रन्थसमाप्तौ समर्थः न अभवत्, ग्रन्थेऽस्मिन् दण्डी गौडीयरीतिमेव प्राधान्येन अनुसृतवान्। ~~...~~ दण्डी पदलालित्ययुक्तानां पदानां प्रयोगं कृतवान्। वस्तुतः दशकुमाचरिते दण्डिना प्रयुक्तं पदसमूहं जगन्मनोहरति। ~~अतः~~ तदुक्तं पण्डितैः– "दण्डिनः पदलालित्यम्" इति।

Scanned with CamScanner